**दादः** [ दद्-घञ् ] A gift, donation; Śi. 19. 114. **-Comp.** **-दः** a donor.

**दाधिक** *a.* ( **-की** *f.* ) 1 Made of or from, or mixed or sprinkled with, coagulated milk. -2 Carrying about or selling coagulated milk. -3 Eating anything with coagulated milk. **-कम्** A kind of broth.

**दान्** 1 U. ( दानति-ते ) To cut, divide. *-Desid.* ( दीदांसति-ते ) To make straight; ( *desid.* in form, but not in sense ).

**दानवः** [ दनोरपत्यं अण् ] A demon, Rākṣasa; त्रिदिवमुद्धृतदानवकण्टकम् Ś. 7. 3. **-Comp.** **-अरिः** 1 a god. -2 an epithet of Viṣṇu. **-गुरुः** an epithet of Śukra.

**दानवेयः** = **दानव** q.v.

**दान्त, दान्तिः** See under दम्.

**दान्तिक** *a.* ( **-की** *f.* ) Made of ivory.

**दापन, दापित** See under दा.

**दामम्** (At the end of a compound) Wreath, garland.

**दामन्** *n.* [ दो-मनिन् ] 1 A string, thread, fillet, rope. -2 A chaplet, a garland in general; आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा Me. 93; कनकचम्पकदामगौरीम् Ch. P. 1; Śi. 4. 50. -3 A line, streak ( as of lightning ); विद्युद्दाम्ना हेमराजीव विन्ध्यम् M. 3. 20; Me. 27. -4 A large bandage. -5 Ved. A gift. -6 A portion, share. -7 A girdle. **-Comp.** **-अञ्चलम्, -अञ्जनम्** a foot-rope for horses, &c.; सद्यः सरोषपरिचारकवार्यमाणा दामाञ्चलस्खलितलोलपदं तुरङ्गाः Śi. 5. 61. **-उदरः** an epithet of Kriṣṇa.

**दामनी** A foot-rope.

**दामा** A string, cord.

**दामिनी** Lightning.

**दाम्नी** A garland; 'यस्या दाम्न्या त्रिधाम्नो जघनकलितया॰' -विष्णुपादादिकेशान्तवर्णनस्तोत्रम् 22.

**दाम्पत्यम्** Matrimony, the matrimonial relation; ये मां भजन्ति दाम्पत्ये तपसा व्रतचर्यया Bhāg. 10. 60. 52.

**दाम्भिक** *a.* ( **-की** *f.* ) [ दम्भेन चरति धर्मम्-ठक् ] 1 Deceitful, hypocritical. -2 Proud, imperious. -3 Ostentatious, sanctimonious. **-कः** 1 A cheat. -2 A hypocrite.

**दायः** [ दा भावे-घञ् ] 1 A gift, present, donation; रहसि रमते प्रीत्या दायं ददात्यनुवर्तते Māl. 3. 2; प्रीतिदायः Māl.4; Ms. 8. 199. -2 A nuptial present ( given to the bride or the bridegroom ). -3 Share, portion, inheritance, patrimony; अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् Ms. 9. 217, 77, 164, 203. -4 A part or share in general. -5 Delivering, handing over. -6 Dividing, distributing. -7 Loss, destruction. -8 Irony. -9 Site, place. -10 Alms given to a student at his initiation, &c. -11 A relative or a kinsman; तेलङ्गदायसहिता निष्पेतुरहिते तदा Parṇal. 5. 79. **-Comp.** **-अपवर्तनम्** forfeiture of inheritance; Ms. 9. 79. **-अर्ह** *a.* claiming inheritance. **-आदः** [ दायमादत्ते, आदा-क] 1 one entitled to a share of patrimony; an heir; पुमान् दायादोऽदायादा स्त्री Nir.; Y. 2. 118; Ms. 8. 160. -2 a son; दितेर्द्वाविव दायादौ दैत्यदानववन्दितौ Bhāg. 6. 18. 11. -3 a relative, kinsman, near or remote; स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने Ki. 11. 45; a distant descendant; अयमिक्ष्वाकुदायादः Rām. 1. 60. 2. -4 a claimant or pretender in general; गवां गोषु वा दायादः Sk. **-आदा, -दी** 1 an heiress. -2 a daughter. **-आद्यम्** 1 inheritance; Ms. 11. 184. -2 the state of being an inheritor. **-कालः** the time of the partition of an inheritance. **-बन्धुः** 1 a partner in the inheritance. -2 a brother. **-भागः** division of property among heirs, partition (of inheritance); दायभागं निबोधत Ms. 9. 103. **-विभागः** division of property. **-हरः** a receiver of inheritance, an heir.

**दायक** *a.* ( **-यिका** *f.* ) [ दा-ण्वुल् ] Giving, granting, bestowing, &c. ( at the end of comp. ); उत्तर॰, पिण्ड॰, &c. **-कः** 1 An heir, inheritor. -2 A donor.

**दायिन्** *a.* ( At the end of comp. ) 1 Giving, granting. -2 Causing, producing; as in क्लेशदायिन् &c.

**दारः** 1 A rent, gap, cleft, hole. -2 A ploughed field. **-राः** [ दारयन्ति ( भ्रातॄन् ) इति दाराः; cf P. III. 3. 20. Vārt. ] *-m.* ( pl. ) A wife; एते वयममी दाराः कन्येयं कुलजीवितम् Ku. 6. 63; दशरथदारानधिष्ठाय वसिष्ठः प्राप्तः U. 4; Pt. 1. 100; Ms. 1. 112; 2. 217; Ś. 4. 17; 5. 29. **-Comp.** **-अधिगमनम्** marriage; Ms. 1. 112. **-अधीन** *a.* dependent on a wife; दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च ह Ms. 9. 24. **-उपसंग्रहः, -संग्रहः, -ग्रहः, -परिग्रहः, -ग्रहणम्** marriage; नवे दारपरिग्रहे U. 1. 19; ततस्तद्वचसा चक्रे स मतिं दारसंग्रहे Bm. 1. 95; 1. 462; यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः। नैतन्मम मतम् Y. 1. 56. **-कर्मन्** *n.*, **-क्रिया** marriage; असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ Ms. 3. 5; सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि 12; अथ राजा दशरथस्तेषां दारक्रियां प्रति ( चिन्तयामास ) Rām. 1. 18. 37; ( विचिन्त्य ) दारक्रियायोग्यदशं च पुत्रम् R. 5. 40. **-बलिभुज्** *m.* a crane, crow.

**दारक** *a.* ( **-रिका** *f.* ) [ दॄ-ण्वुल् ] Breaking, tearing, splitting; दारिका हृदयदारिका पितुः. **-कः** 1 A boy, a son. ( **-की** ) A girl, a daughter; कथं नु दारका दीना दारकीवापरायणाः। वर्तिष्यन्ते मयि गते भिन्नानाव इवोदधौ॥ Bhāg. 4. 28. 21. -2 A child, infant. -3 Any young animal. -4 A village hog. **-Comp.** **-आचार्यः** a schoolmaster.

**दारणम्** [ दॄ-णिच् युच् ] 1 Splitting, tearing, rending, opening, cleaving. -2 The fruit of the clearing-nut plant. **-णी** N. of Durgā.

**दारिका** 1 A daughter. -2 A harlot. -3 A rent, cleft. **-Comp.** **-दानम्** the gift of a daughter in marriage.

**दारव** *a.* ( **-वी** *f.* ) Wooden, made of wood; कदापि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि Bhāg. 11. 8. 13.

**दारिः** *f.* Tearing, cutting.